श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकनवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकनवतितमः सर्गः ॥

## श्रीरामपार्श्वमागम्य लक्ष्मणविभीषणप्रभृतिभिरिन्द्रजिद्वधवृत्तान्तस्य श्रावणं सन्तुष्टेन श्रीरामेण लक्ष्मणं परिष्वज्य तस्य प्रशंसनं सुषेणेन लक्ष्मणादीनां चिकित्सनं च

रुधिरक्लिन्नगात्रस्तु लक्ष्मणः शुभलक्षणः।
बभूव हृष्टस्तं हत्वा शत्रुजेतारमाहवे॥ **6.91.1** ॥

ततः स जाम्बवन्तं च हनूमन्तं च वीर्यवान्।
सन्निपत्य महातेजास्तांश्च सर्वान् वनौकसः॥ **6.91.2** ॥

आजगाम ततः शीघ्रं यत्र सुग्रीवराघवौ।
विभीषणमवष्टभ्य हनूमन्तं च लक्ष्मणः॥ **6.91.3** ॥

ततो राममभिक्रम्य सौमित्रिरभिवाद्य च।
तस्थौ भ्रातृसमीपस्थः शक्रस्येन्द्रानुजो यथा॥ **6.91.4** ॥

निष्टनन्निव चागत्य राघवाय महात्मने।
आचचक्षे तदा वीरो घोरमिन्द्रजितो वधम्॥ **6.91.5** ॥

रावणेस्तु शिरश्छिन्नं लक्ष्मणेन महात्मना।
न्यवेदयत रामाय तदा हृष्टो विभीषणः॥ **6.91.6** ॥

श्रुत्वैव तु महावीर्यो लक्ष्मणेनेन्द्रजिद्वधम्।
प्रहर्षमतुलं लेभे वाक्यं चेदमुवाच ह॥ **6.91.7** ॥

साधु लक्ष्मण तुष्टोऽस्मि कर्म चासुकरं कृतम्।
रावणेर्हि विनाशेन जितमित्युपधारय॥ **6.91.8** ॥

स तं शिरस्युपाघ्राय लक्ष्मणं कीर्तिवर्धनम्।
लज्जमानं बलात् स्नेहादङ्कमारोप्य वीर्यवान्॥ **6.91.9** ॥

उपवेश्य तमुत्सङ्गे परिष्वज्यावपीडितम्।
भ्रातरं लक्ष्मणं स्निग्धं पुनः पुनरुदैक्षत॥ **6.91.10** ॥

शल्यसम्पीडितं शस्तं निःश्वसन्तं तु लक्ष्मणम्।
रामस्तु दुःखसन्तप्तं तं तु निःश्वासपीडितम्॥ **6.91.11** ॥

मूर्ध्नि चैनमुपाघ्राय भूयः संस्पृश्य च त्वरन्।
उवाच लक्ष्मणं वाक्यमाश्वास्य पुरुषर्षभः॥ **6.91.12** ॥

कृतं परमकल्याणं कर्म दुष्करकर्मणा।
अद्य मन्ये हते पुत्रे रावणं निहतं युधि॥ **6.91.13** ॥

अद्याहं विजयी शत्रौ हते तस्मिन् दुरात्मनि।
रावणस्य नृशंसस्य दिष्ट्या वीर त्वया रणे॥ **6.91.14** ॥

छिन्नो हि दक्षिणो बाहुः स हि तस्य व्यपाश्रयः।
विभीषणहनूमद्भ्यां कृतं कर्म महद् रणे॥ **6.91.15** ॥

अहोरात्रैस्त्रिभिर्वीरः कथञ्चिद् विनिपातितः।
निरमित्रः कृतोऽस्म्यद्य निर्यास्यति हि रावणः॥ **6.91.16** ॥

बलव्यूहेन महता निर्यास्यति हि रावणः।
बलव्यूहेन महता श्रुत्वा पुत्रं निपातितम्॥ **6.91.17** ॥

तं पुत्रवधसन्तप्तं निर्यान्तं राक्षसाधिपम्।
बलेनावृत्य महता निहनिष्यामि दुर्जयम्॥ **6.91.18** ॥

त्वया लक्ष्मण नाथेन सीता च पृथिवी च मे।
न दुष्प्रापा हते तस्मिञ्शक्रजेतरि चाहवे॥ **6.91.19** ॥

स तं भ्रातरमाश्वास्य परिष्वज्य च राघवः।
रामः सुषेणं मुदितः समाभाष्येदमब्रवीत्॥ **6.91.20** ॥

विशल्योऽयं महाप्राज्ञ सौमित्रिर्मित्रवत्सलः।
यथा भवति सुस्वस्थस्तथा त्वं समुपाचर॥ **6.91.21** ॥

विशल्यः क्रियतां क्षिप्रं सौमित्रिः सविभीषणः।
ऋक्षवानरसैन्यानां शूराणां द्रुमयोधिनाम्॥ **6.91.22** ॥

ये चाप्यन्येऽत्र युध्यन्ति सशल्या व्रणिनस्तथा।
तेऽपि सर्वे प्रयत्नेन क्रियन्ते सुखिनस्त्वया॥ **6.91.23** ॥

एवमुक्तः स रामेण महात्मा हरियूथपः।
लक्ष्मणाय ददौ नस्तः सुषेणः परमौषधम्॥ **6.91.24** ॥

स तस्य गन्धमाघ्राय विशल्यः समपद्यत।
तदा निर्वेदनश्चैव संरूढव्रण एव च॥ **6.91.25** ॥

विभीषणमुखानां च सुहृदां राघवाज्ञया।
सर्ववानरमुख्यानां चिकित्सामकरोत् तदा॥ **6.91.26** ॥

ततः प्रकृतिमापन्नो हृतशल्यो गतक्लमः।
सौमित्रिर्मुमुदे तत्र क्षणेन विगतज्वरः॥ **6.91.27** ॥

तदैव रामः प्लवगाधिपस्तथा
  विभीषणश्चर्क्षपतिश्च वीर्यवान्।
अवेक्ष्य सौमित्रिमरोगमुत्थितं
  मुदा ससैन्याः सुचिरं जहर्षिरे॥ **6.91.28** ॥

अपूजयत् कर्म स लक्ष्मणस्य
    सुदुष्करं दाशरथिर्महात्मा।
हृष्टा बभूवुर्युधि यूथपेन्द्रा
    निपातितं शक्रजितं निशम्य॥ **6.91.29** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकनवतितमः सर्गः॥